# ब्रह्मसूत्रम्

**अथाध्यासप्रतिज्ञाभाष्यम्**

युष्मदस्मत्प्रत्यय-गोचरयोर्विषय-विषयिणोस्तमः-प्रकाशवद् विरुद्ध-स्वभावयोः इतरेतर-भावानुपपत्तौ सिद्धायाम्, तद्धर्माणामपि सुतराम् इतरेतर-भावानुपपत्तिः इत्यतोऽस्मत्-प्रत्यय-गोचरे विषयिणि चिदात्मके युष्मत्प्रत्यय-गोचरस्य विषयस्य तद्धर्माणां चाध्यासः तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्।

तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य इतरेतराविवेकेन अत्यन्त-विविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञान-निमित्तः सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोक-व्यवहारः।

**अथाध्यासलक्षणभाष्यम्**

आह - कोऽयमध्यासो नाम इति। उच्यते। स्मृति-रूपः परत्र पूर्वदृष्टावभासः।

तं केचिदन्यत्रान्य-धर्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासस्तद्विवेकाग्रह-निबन्धनो भ्रम इति।

अन्ये तु यत्र यदध्यासस्तस्यैव विपरीत-धर्मत्व-कल्पनामाचक्षत इति।

सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः - शुक्तिका हि रजतवद् अवभासते।

एकश्चन्द्रः सद्वितीयवदिति।

**अथाध्याससम्भावनाभाष्यम्**

**आक्षेपः**

कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्। सर्वो हि पुरोवस्थिते विषये विषयान्तरमध्यस्यति।

युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि।

**समाधानम्**

उच्यते। न तावदयमेकान्तेनाविषयः। अस्मत्प्रत्यय-विषयत्वात्, अपरोक्षत्वाच्च प्रत्यगात्म-सिद्धेः।

न चायमस्ति नियमः पुरोवस्थित एव विषये विषयान्तरम् अध्यसितव्यमिति।

अप्रत्यक्षेऽपि ह्याकाशे बालास्तल-मलिनताद्यध्यस्यन्ति।

**अथ विद्याविद्याविवेकभाष्यम्**

तमेतमेवं-लक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेकेन च वस्तु-स्वरूपावधारणं विद्यामाहुः।

तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाणुमात्रमपि स न सम्बध्यते।

**अथ व्यवहारमात्रस्याविद्यकत्वप्रतिपादकं भाष्यम्।**

तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाण-प्रमेय-व्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः।

सर्वाणि च शास्त्राणि विधि-प्रतिषेध-मोक्ष-पराणि।

**आक्षेपः**

कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति।

**समाधानम्**

उच्यते। देहेन्द्रियादिष्वहंममाभिमान-रहितस्य प्रमातृत्वानुपपत्तौ प्रमाण-प्रवृत्त्यनुपपत्तेः।

न हि इन्द्रियाण्यनुपादाय प्रत्यक्षादि-व्यवहारः सम्भवति।

न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः सम्भवति।

न च अनध्यस्तात्म-भावेन देहेन कश्चिद्व्याप्रियते।

न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते।

न च प्रमातृत्वमन्तरेण प्रमाण-प्रवृत्तिरस्ति।

तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च।

पश्वादिभिश्चाविशेषात्।

यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादि-विज्ञाने प्रतिकूले जाते ततो निवर्त्तन्ते,

अनुकूले च प्रवर्त्तन्ते। यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते,

हरित-तृण-पूर्ण-पाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति।

एवं पुरुषा अपि व्युत्पन्न-चित्ताः क्रूर-दृष्टीनाक्रोशतः खड्गोद्यत-करान् बलवतः उपलभ्य ततो निवर्त्तन्ते।

तद्विपरीतान् प्रति प्रवर्त्तन्ते।

अतः समानः पश्वादिभिः पुरुषाणां प्रमाण-प्रमेय-व्यवहारः।

पश्वादीनां च प्रसिद्धोऽविवेक-पुरस्सरः प्रत्यक्षादि-व्यवहारः।

तत्सामान्य-दर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादि-व्यवहारस्तत्कालः समान इति निश्चीयते।

**शास्त्रव्यवहारस्याप्यविद्यापुरस्सरत्वप्रदर्शनभाष्यम्**

शास्त्रीये तु व्यवहारे यद्यपि बुद्धि-पूर्वकारी नाविदित्वात्मनः पर-लोक- सम्बन्धमधिक्रियते।

तथापि न वेदान्त-वेद्यमशनायाद्यतीतमपेत-ब्रह्म-क्षत्रादि-भेदम् असंसर्यात्म-तत्वम् अधिकारेऽपेक्ष्यते।

अनुपयोगात्, अधिकार-विरोधाच्च।

प्राक्च तथाभूतात्म-विज्ञानात् प्रवर्त्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्त्तते।

तथा हि बाह्मणो यजेत इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रम-वयोऽवस्थादि-विशेषाध्यासमाश्रित्य प्रवर्त्तन्ते।

**अथाध्यासप्रकारप्रदर्शनभाष्यम्।**

अध्यासो नाम अतस्मिंस्तद्-बुद्धिरित्यवोचाम।

तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्य-धर्मानात्मन्यध्यस्यति।

तथा देह-धर्मान् स्थूलोऽहम् कृशोऽहम् गौरोऽहम् तिष्ठामि गच्छामि लङ्घयामि चेति।

तथेन्द्रिय-धर्मान् मूकः काणः क्लीबः बधिरः अन्धोऽहम् इति।

तथान्तःकरण-धर्मान् काम-सङ्कल्प-विचिकित्साध्यवसायादीन्।

एवमहं-प्रत्ययिनमशेष-स्व-प्रचार-साक्षिणि प्रत्यगात्मनि अध्यस्य तं च प्रत्यगात्मानं सर्व-साक्षिणं

तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति।

**अथाध्यासविचारोपसंहारभाष्यम्**

एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्या-प्रत्यय-रूपः कर्तृत्व-भोक्तृत्व-प्रवर्त्तकः सर्व-लोक-प्रत्यक्षः।

**अथ मीमांसावकरणिकाभाष्यम्**

अस्यानर्थ-हेतोः प्रहाणायात्मैकत्व-प्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते।

यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरक-मीमांसायां प्रदर्शयिष्यामः।

।। प्रथमोऽध्यायः ।।

।। प्रथमः पादः ।।

जिज्ञासाधिकरणम्। (१/१)

**अथातो ब्रह्मजिज्ञासा।। १.१.१।।**

अत्र **अथ**-शब्दः आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः। ब्रह्म-जिज्ञासाया अनधिकार्यत्वात्।

मङ्गलस्य च वाक्यार्थे समन्वयाभावात्। अर्थान्तर-प्रयुक्त एव ह्यथ-शब्दः श्रुत्या मङ्गल-प्रयोजनो भवति।

पूर्व-प्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्।

सति च आनन्तर्यार्थत्वे, यथा धर्म-जिज्ञासा पूर्व-वृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्म-जिज्ञासापि यत्पूर्व-वृत्तं

नियमेनापेक्षते तद्वक्तव्यम्। स्वाध्यायाध्ययनानन्तर्यं तु समानम्।

**आक्षेपः**

नन्विह कर्मावबोधानन्तर्यं विशेषः।

**समाधानम्**

न, धर्म-जिज्ञासायाः प्रागपि अधीत-वेदान्तस्य ब्रह्म-जिज्ञासोपपत्तेः।

यथा च हृदयाद्यवदानानामानन्तर्य-नियमः, क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः।

शेष-शेषित्वे अधिकृताधिकारे वा प्रमाणाभावाद् धर्म-ब्रह्म-जिज्ञासयोः।

फल-जिज्ञास्य-भेदाच्च। अभ्युदय-फलं धर्म-ज्ञानम्, तच्चानुष्ठानापेक्षम्।

निःश्रेयस-फलं तु ब्रह्म-ज्ञानम्, न चानुष्ठानान्तरापेक्षम्।

भव्यश्च धर्मो जिज्ञास्यो न ज्ञान-कालेऽस्ति, पुरुष-व्यापार-तन्त्रत्वात्।

इह तु भूतं ब्रह्म जिज्ञास्यं नित्य-वृत्तत्वान्न पुरुष-व्यापार-तन्त्रम्।

चोदना-प्रवृत्ति-भेदाच्च। या हि चोदना धर्मस्य लक्षणम्, सा स्व-विषये नियुञ्जानैव पुरुषमवबोधयति।

ब्रह्म-चोदना तु पुरुषमवबोधयत्येव केवलम्।

अवबोधस्य चोदनाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते - यथा अक्षार्थ-सन्निकर्षेणार्थावबोधे, तद्वत्।

तस्मात्किमपि वक्तव्यम्, यदनन्तरं ब्रह्म-जिज्ञासोपदिश्यत इति।

उच्यते - नित्यानित्य-वस्तु-विवेकः, इहामुत्रार्थ-भोग-विरागः, शम-दमादि-साधन-सम्पत्, मुमुक्षुत्वं च।

तेषु हि सत्सु, प्रागपि धर्म-जिज्ञासाया ऊर्ध्वं च, शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये।

तस्माद् अथ-शब्देन यथोक्त-साधन-सम्पत्त्यानन्तर्यमुपदिश्यते।

**अतः**-शब्दः हेत्वर्थः। यस्माद्वेद एव अग्निहोत्रादीनां श्रेयःसाधनानामनित्य-फलतां दर्शयति -

“तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते”(छा. ८.१.६) इत्यादिः।

तथा ब्रह्म-ज्ञानादपि परं पुरुषार्थं दर्शयति - **द्य**ब्रह्मविदाप्नोति परम्”(तै. २.१) इत्यादिः।

तस्माद् यथोक्त-साधन-सम्पत्त्यनन्तरं ब्रह्म-जिज्ञासा कर्तव्या।

ब्रह्मणो जिज्ञासा **ब्रह्मजिज्ञासा**। ब्रह्म च वक्ष्यमाण-लक्षणम् "जन्माद्यस्य यतः"इति।

अत एव न ब्रह्म-शब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम्।

ब्रह्मण इति कर्मणि षष्ठी, न शेषे।

जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च।

**आक्षेपः**

ननु शेष-षष्ठी-परिग्रहेऽपि ब्रह्मणो जिज्ञासा-कर्मत्वं न विरुध्यते, सम्बन्ध-सामान्यस्य विशेष-निष्ठत्वात्।

**समाधानम्**

एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्य-द्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्।

**आक्षेपः**

न व्यर्थः। ब्रह्माश्रिताशेष-विचार-प्रतिज्ञानार्थत्वादिति चेत्।

**समाधानम्**

न। प्रधान-परिग्रहे तदपेक्षितानामपि अर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम्।

तस्मिन्प्रधाने जिज्ञासा-कर्मणि परिगृहीते, यैर्जिज्ञासितैः विना ब्रह्म जिज्ञासितं न भवति, तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि। यथा "राजासौ गच्छति" इत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति, तद्वत्।

श्रुत्यनुगमाच्च। "यतो वा इमानि भूतानि जायन्ते"(तै. ३.१) इत्याद्याः श्रुतयः "तद्विजिज्ञासस्व तद्ब्रह्म"(तै. ३.१) इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासा-कर्मत्वं दर्शयन्ति।

तच्च कर्मणि षष्ठी-परिग्रहे सूत्रेणानुगतं भवति।

तस्माद् ब्रह्मण इति कर्मणि षष्ठी।

ज्ञातुमिच्छा जिज्ञासा। अवगति-पर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म, फल-विषयत्वादिच्छायाः।

ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म।

ब्रह्मावगतिर्हि पुरुषार्थः, निःशेष-संसार-बीजाविद्याद्यनर्थ-निबर्हणात्।

तस्माद् ब्रह्म जिज्ञासितव्यम्।

**आक्षेपः**

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं न जिज्ञासितव्यम्। अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति।

**समाधानम्**

उच्यते - अस्ति तावद् ब्रह्म नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावं सर्वज्ञं सर्व-शक्ति-समन्वितम्।

ब्रह्म-शब्दस्य हि व्युत्पाद्यमानस्य नित्य-शुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृंहतेर्धातोरर्थानुगमात्।

सर्वस्यात्मत्वाच्च ब्रह्मास्तित्व-प्रसिद्धिः। सर्वो ह्यात्मास्तित्वं प्रत्येति, न **'**नाहमस्मि**'** इति।

यदि हि नात्मास्तित्व-प्रसिद्धिः स्यात्, सर्वो लोकः **'**नाहमस्मि**'** इति प्रतीयात्।

आत्मा च ब्रह्म।

**आक्षेपः**

यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्।

**समाधानम्**

न। तद्विशेषं प्रति विप्रतिपत्तेः। देहमात्रं चैतन्य-विशिष्टमात्मेति प्राकृता जना लौकायतिकाश्च प्रतिपन्नाः।

इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञान-मात्रं क्षणिकमित्येके।

शून्यमित्यपरे। अस्ति देहादि-व्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्त्तेत्येके।

अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्व-शक्तिरिति केचित्। आत्मा स भोक्तुरित्यपरे।

एवं बहवो विप्रतिपन्ना युक्ति-वाक्य-तदाभास-समाश्रयाः सन्तः।

तत्राविचार्य यत्किञ्चित् प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात्।

तस्माद् ब्रह्म-जिज्ञासोपन्यास-मुखेन वेदान्त-वाक्य-मीमांसा तदविरोधि-तर्कोपकरणा निःश्रेयस-प्रयोजना

प्रस्तूयते।। १.१.१ ।।

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान्सूत्रकारः -

जन्माद्यधिकरणम्। (२/१)

**जन्माद्यस्य यतः।। १.१.२।।**

**जन्म** उत्पत्तिः **आदिः** **अस्य** इति तद्गुण-संविज्ञानो बहु-व्रीहिः। जन्म-स्थिति-भङ्गं समासार्थः।

जन्मनश्चादित्वं श्रुति-निर्देशापेक्षं वस्तु-वृत्तापेक्षं च।

श्रुति-निर्देशस्तावत् - "यतो वा इमानि भूतानि जायन्ते"(तै. ३.१) इति, अस्मिन्वाक्ये जन्म-स्थिति-प्रलयानां

क्रम-दर्शनात्।

वस्तु-वृत्तमपि - जन्मना लब्ध-सत्ताकस्य धर्मिणः स्थिति-प्रलय-सम्भवात्।

अस्येति प्रत्यक्षादि-सन्निधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादि-धर्म-सम्बन्धार्था।

**यतः** इति कारण-निर्देशः।

अस्य जगतो नाम-रूपाभ्यां व्याकृतस्य अनेक-कर्तृ-भोक्तृ-संयुक्तस्य प्रतिनियत-देश-काल-निमित्त-क्रिया-फलाश्रयस्य मनसाप्यचिन्त्य-रचना-रूपस्य जन्म-स्थिति-भङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति, तद् ब्रह्मेति वाक्य-शेषः।

अन्येषामपि भाव-विकाराणां त्रिष्वेवान्तर्भाव इति जन्म-स्थिति-नाशानामिह ग्रहणम्।

यास्क-परिपठितानां तु “जायतेऽस्ति”इत्यादीनां ग्रहणे तेषां जगतः स्थिति-काले सम्भाव्यमानत्वाद् मूल-कारणादुत्पत्ति-स्थिति-नाशा जगतो न गृहीताः स्युः इत्याशङ्क्येत।

तन्मा शङ्कि इति या उत्पत्तिर्ब्रह्मणः कारणात्, तत्रैव स्थितिः प्रलयश्च, ते गृह्यन्ते।

न च यथोक्त-विशेषणस्य जगतो यथोक्त-विशेषणमीश्वरं मुक्त्वा, अन्यतः प्रधानादचेतनाद् अणुभ्यो वा अभावाद्वा संसारिणो वा उत्पत्त्यादि सम्भावयितुं शक्यम्।

न च स्वभावतः, विशिष्ट-देश-काल-निमित्तानामिहोपादानात्।

**आक्षेपः**

एतदेवानुमानं संसारि-व्यतिरिक्तेश्वरास्तित्वादि-साधनं मन्यन्ते ईश्वर-कारण-वादिनः।

नन्विहापि तदेवोपन्यस्तं जन्मादि-सूत्रे।

**समाधानम्**

न। वेदान्त-वाक्य-कुसुम-ग्रथनार्थत्वात्सूत्राणाम्। वेदान्त-वाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते।

वाक्यार्थ-विचारणाध्यवसान-निर्वृत्ता हि ब्रह्मावगतिः, नानुमानादि-प्रमाणान्तर-निर्वृत्ता।

सत्सु तु वेदान्त-वाक्येषु जगतो जन्मादि-कारण-वादिषु, तदर्थ-ग्रहण-दार्ढ्याय अनुमानमपि वेदान्त-वाक्याविरोधि

प्रमाणं भवत्, न निवार्यते, श्रुत्यैव च सहायत्वेन तर्कस्याप्यभ्युपेतत्वात्।

तथा हि - “श्रोतव्यो मन्तव्यः”(बृ. २.४.५) इति श्रुतिः “पण्डितो मेधावी गन्धारानेवोपसम्पद्येत एवमेवेहाचार्यवान्पुरुषो वेद”(छा. ६.१४.२) इति च पुरुष-बुद्धि-साहाय्यमात्मनो दर्शयति।

न धर्म-जिज्ञासायाम् इव श्रुत्यादय एव प्रमाणं ब्रह्म-जिज्ञासायाम्।

किन्तु श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम्, अनुभवावसानत्वाद् भूत-वस्तु-विषयत्वाच्च ब्रह्म-ज्ञानस्य।

कर्त्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्म-लाभत्वाच्च कर्त्तव्यस्य।

कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म।

यथा अश्वेन गच्छति, पद्भ्याम्, अन्यथा वा, न वा गच्छतीति।

तथा "अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति" "उदिते जुहोति, अनुदिते जुहोति" इति।

विधि-प्रतिषेधाश्च अत्र अर्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च।

न तु वस्तु 'एवम्, नैवम्' 'अस्ति, नास्ति' इति वा विकल्प्यते।

विकल्पनास्तु पुरुष-बुद्ध्यपेक्षाः। न वस्तु-याथात्म्य-ज्ञानं पुरुष-बुद्ध्यपेक्षम्।

किं तर्हि? वस्तु-तन्त्रमेव तत्। न हि स्थाणावेकस्मिन् 'स्थाणुर्वा, पुरुषोऽन्यो वा' इति तत्त्व-ज्ञानं भवति।

तत्र 'पुरुषोऽन्यो वा' इति मिथ्या-ज्ञानम्। 'स्थाणुरेव' इति तत्त्व-ज्ञानम्, वस्तु-तन्त्रत्वात्।

एवं भूत-वस्तु-विषयाणां प्रामाण्यं वस्तु-तन्त्रम्। तत्रैवं सति ब्रह्म-ज्ञानमपि वस्तु-तन्त्रमेव, भूत-वस्तु-विषयत्वात्।

**आक्षेपः**

ननु भूत-वस्तु-विषयत्वे ब्रह्मणः प्रमाणान्तर-विषयत्वमेवेति वेदान्त-वाक्य-विचारणा अनर्थिकैव प्राप्ता।

**समाधानम्**

न। इन्द्रियाविषयत्वेन सम्बन्धाग्रहणात्। स्वभावतो विषय-विषयाणीन्द्रियाणि, न ब्रह्म-विषयाणि।

सति हीन्द्रिय-विषयत्वे ब्रह्मणः, इदं ब्रह्मणा सम्बद्धं कार्यमिति गृह्येत।

कार्य-मात्रमेव तु गृह्यमाणम् - किं ब्रह्मणा सम्बद्धम्? किमन्येन केनचिद्वा सम्बद्धम्? - इति न शक्यं निश्चेतुम्।

तस्माज्जन्मादि-सूत्रं नानुमानोपन्यासार्थम्, किं तर्हि वेदान्त-वाक्य-प्रदर्शनार्थम्।

किं पुनस्तद्वेदान्त-वाक्यं यत् सूत्रेणेह लिलक्षयिषितम्। “भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति”(तै. ३.१) इत्युपक्रम्याह - “यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति”(तै. ३.१)।

तस्य च निर्णय-वाक्यम् - “आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ति”(तै. ३.६) इति। अन्यान्यपि एवंजातीयकानि वाक्यानि नित्य-शुद्ध-बुद्ध-मुक्त-स्वभाव-सर्वज्ञ-स्वरूप-कारण-विषयाणि उदाहर्त्तव्यानि।। १.१.२ ।।

शास्त्रयोनित्वाधिकरणम्। (३/१)

जगत्कारणत्व-प्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तदेव द्रढयन्नाह -

**शास्त्रयोनित्वात्।। १.१.३।।**

महत ऋग्वेदादेः **शास्त्रस्य** अनेक-विद्या-स्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञ-कल्पस्य **योनिः**

कारणं ब्रह्म।

न हीदृशस्य शास्त्रस्य ऋग्वेदादि-लक्षणस्य सर्वज्ञ-गुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति।

यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुष-विशेषात् सम्भवति, यथा व्याकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि,

स ततोऽप्यधिकतर-विज्ञान इति प्रसिद्धं लोके।

किमु वक्तव्यम् - अनेक-शाखा-भेद-भिन्नस्य देव-तिर्यङ्-मनुष्य-वर्णाश्रमादि-प्रविभाग-हेतोः ऋग्वेदाद्याख्यस्य

सर्व-ज्ञानाकरस्य अप्रयत्नेनैव लीला-न्यायेन पुरुष-निःश्वासवत् यस्मान्महतो भूताद् योनेः सम्भवः,

"अस्य महतो भूतस्य निःश्वसितमेतत् यदृग्वेदः"(बृ. २.४.१०) इत्यादि-श्रुतेः, तस्य महतो भूतस्य निरतिशयं

सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति।

अथवा यथोक्तमृग्वेदादि-**शास्त्रं योनिः** कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगमे।

शास्त्रादेव प्रमाणात् जगतो जन्मादि-कारणं ब्रह्माधिगम्यत इत्यभिप्रायः।

शास्त्रमुदाहृतं पूर्व-सूत्रे - "यतो वा इमानि भूतानि जायन्ते"(तै. ३.१) इत्यादि।

**आक्षेपः**

किमर्थं तर्हीदं सूत्रम्, यावता पूर्व-सूत्रेणैव एवंजातीयकं शास्त्रमुदाहरता शास्त्र-योनित्वं ब्रह्मणो दर्शितम्।

**समाधानम्**

उच्यते। तत्र सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादि-सूत्रेण केवलमनुमानम् उपन्यस्तम् इत्याशङ्क्येत।

तामाशङ्कां निवर्त्तयितुमिदं सूत्रं प्रववृते - "शास्त्रयोनित्वात्"इति।। १.१.३ ।।

समन्वयाधिकरणम्। (४/१)

कथं पुनर्ब्रह्मणः शास्त्र-प्रमाणकत्वमुच्यते, यावता “आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्”(जै.सू. १.२.१)

इति क्रिया-परत्वं शास्त्रस्य प्रदर्शितम्।

अतो वेदान्तानामानर्थक्यम्, अक्रियार्थत्वात्, कर्तृ-देवतादि-प्रकाशनार्थत्वेन वा क्रिया-विधि-शेषत्वम्,

उपासनादि-क्रियान्तर-विधानार्थत्वं वा।

न हि परिनिष्ठित-वस्तु-स्वरूप-प्रतिपादनं सम्भवति। प्रत्यक्षादि-विषयत्वात्परिनिष्ठित-वस्तुनः।

तत्प्रतिपादने च हेयोपादेय-रहिते पुरुषार्थाभावात्।

अत एव “सोऽरोदीत्”इत्येवमादीनामानर्थक्यं मा भूदिति “विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः”(जै.सू. १.२.७) इति स्तावकत्वेन अर्थवत्त्वमुक्तम्। मन्त्राणां च “इषे त्वा”इत्यादीनां क्रिया-तत्साधनाभिधायकत्वेन कर्म-समवायित्वमुक्तम्।

अतो न क्वचिदपि वेद-वाक्यानां विधि-संस्पर्शमन्तरेणार्थवत्ता दृष्टा उपपन्ना वा।

न च परिनिष्ठिते वस्तु-स्वरूपे विधिः सम्भवति, क्रिया-विषयत्वाद्विधेः।

तस्मात्कर्मापेक्षित-कर्तृ-देवतादि-स्वरूप-प्रकाशनेन क्रिया-विधि-शेषत्वं वेदान्तानाम्।

अथ प्रकरणान्तरभयान्नैतद् अभ्युपगम्यते, तथापि स्व-वाक्य-गतोपासनादि-कर्म-परत्वम्।

तस्मान्न ब्रह्मणः शास्त्र-योनित्वमिति प्राप्ते, उच्यते -

**तत्तु समन्वयात्।। १.१.४।।**

**तु**-शब्दः पूर्व-पक्ष-व्यावृत्त्यर्थः।

**तद्** ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्ति-स्थिति-लय-कारणं वेदान्त-शास्त्रादवगम्यते।

कथम्? **समन्वयात्**। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि।

"सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम्"(छा. ६.२.१) "आत्मा वा इदमेक एवाग्र आसीत्"(ऐ. १.१.१)

"तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्। अयमात्मा ब्रह्म सर्वानुभूः"(बृ.२.५.१९) "ब्रह्मैवेदममृतं पुरस्तात्"(मु.

२.२.११) इत्यादीनि।

न च तद्गतानां पदानां ब्रह्म-स्वरूप-विषये निश्चिते समन्वये अवगम्यमाने अर्थान्तर-कल्पना युक्ता, श्रुत-हान्यश्रुत-कल्पना-प्रसङ्गात्।

न च तेषां कर्तृ-देवतादि-स्वरूप-प्रतिपादन-परता अवसीयते, "तत्केन कं पश्येत्"(बृ. २.४.१४) इत्यादि-क्रिया-कारक-फल-निराकरण-श्रुतेः।

न च परिनिष्ठित-वस्तु-स्वरूपत्वेऽपि प्रत्यक्षादि-विषयत्वं ब्रह्मणः।

"तत्त्वमसि"(छा. ६.८.७) इति ब्रह्मात्म-भावस्य शास्त्रमन्तरेण अनवगम्य-मानत्वात्।

यत्तु हेयोपादेय-रहितत्वादुपदेशानर्थक्यमिति।

नैष दोषः। हेयोपादेय-शून्य-ब्रह्मात्मतावगमादेव सर्व-क्लेश-प्रहाणात्पुरुषार्थ-सिद्धेः।

देवतादि-प्रतिपादन-परस्य तु स्व-वाक्य-गतोपासनार्थत्वेऽपि न कश्चिद्विरोधः।

न तु तथा ब्रह्मण उपासना-विधि-शेषत्वं सम्भवति, एकत्वे हेयोपादेय-शून्यतया क्रिया-कारकादि-द्वैत-विज्ञानोप-

मर्दोपपत्तेः।

न हि ब्रह्मैकत्व-विज्ञानेनोन्मथितस्य द्वैत-विज्ञानस्य पुनः सम्भवोऽस्ति येनोपासना-विधि-शेषत्वं ब्रह्मणः

प्रतिपाद्येत।

यद्यप्यन्यत्र वेद-वाक्यानां विधि-संस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथाप्यात्म-विज्ञानस्य फल-पर्यन्तत्वान्न

तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्।

न चानुमान-गम्यं शास्त्र-प्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्ष्येत।

तस्मात्सिद्धं ब्रह्मणः शास्त्र-प्रमाणकत्वम्।

**पूर्वपक्षोत्थापनम् (वृत्तिकारमतम्)**

अत्रापरे प्रत्यवतिष्ठन्ते - यद्यपि शास्त्र-प्रमाणकं ब्रह्म, तथापि प्रतिपत्ति-विधि-विषयतयैव शास्त्रेण ब्रह्म समर्प्यते।

यथा यूपाहवनीयादीन्यलौकिकान्यपि विधि-शेषतया शास्त्रेण समर्प्यन्ते, तद्वत्।

कुत एतत्? प्रवृत्ति-निवृत्ति-प्रयोजन-परत्वात् शास्त्रस्य।

तथा हि शास्त्र-तात्पर्य-विदामनुक्रमणम् - “दृष्टो हि तस्यार्थः कर्मावबोधनं नाम”(शा.भा. १.१.१) इति।

“चोदनेति क्रियायाः प्रवर्त्तकं वचनम्”(शा.भा. १.१.२) “तस्य ज्ञानमुपदेशः”(जै.सू. १.१.५) “तद्भूतानां क्रियार्थेन समाम्नायः”(जै.सू. १.१.२५) “आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्”(जै.सू. १.२.१) इति च।

अतः पुरुषं क्वचिद्विषय-विशेषे प्रवर्त्तयत्कुतश्चिद्विषय-विशेषान्निवर्त्तयच्च अर्थवच्छास्त्रम्।

तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्।

सति च विधि-परत्वे, यथा स्वर्गादि-कामस्य अग्निहोत्रादि-साधनं विधीयते, एवममृतत्व-कामस्य ब्रह्म-ज्ञानं विधीयत इति युक्तम्।

### आक्षेपः

नन्विह जिज्ञास्य-वैलक्षण्यमुक्तम् - "कर्म-काण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्य-निर्वृत्तं ब्रह्म जिज्ञास्यमिति। तत्र धर्म-ज्ञान-फलादनुष्ठान-सापेक्षाद्विलक्षणं ब्रह्म-ज्ञान-फलं भवितुमर्हति।

### पूर्वपक्षिणः समाधानम्

नार्हत्येवं भवितुम्। कार्य-विधि-प्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्। "आत्मा वा अरे द्रष्टव्यः"(बृ. १.४.५) "य आत्मापहतपाप्मा...सोऽन्वेष्टव्यः स विजिज्ञासितव्यः"(छा. ८.७.१) "आत्मेत्येवोपासीत"(बृ. १.४.७) "आत्मानमेव लोकमुपासीत"(बृ. १.४.१५) "ब्रह्म वेद ब्रह्मैव भवति"(मु. ३.२.९) इत्यादिषु विधानेषु सत्सु, 'कोऽसावात्मा?', 'किं तद्ब्रह्म?' इत्याकाङ्क्षायां तत्स्वरूप-समर्पणेन सर्वे वेदान्ता उपयुक्ताः - नित्यः,

सर्वज्ञः, सर्वगतः, नित्यतृप्तः, नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावः, विज्ञानमानन्दं ब्रह्म, इत्येवमादयः।

तदुपासनाच्च शास्त्र-दृष्टोऽदृष्टो मोक्षः फलं भविष्यति।

कर्त्तव्य-विध्यननुप्रवेशे तु वस्तु-मात्र-कथने हानोपादानासम्भवात् 'सप्तद्वीपा वसुमती', 'राजासौ गच्छति'

इत्यादि-वाक्यवद् वेदान्त-वाक्यानामानर्थक्यमेव स्यात्।

**आक्षेपः**

ननु वस्तु-मात्र-कथनेऽपि 'रज्जुरियम्, नायं सर्पः' इत्यादौ भ्रान्ति-जनित-भीति-निवर्त्तनेनार्थवत्त्वं दृष्टम्।

तथा इहाप्यसंसार्यात्म-वस्तु-कथनेन संसारित्व-भ्रान्ति-निवर्त्तनेनार्थवत्त्वं स्यात्।

**पूर्वपक्षिणः समाधानम्**

स्यादेतदेवम्, यदि रज्जु-स्वरूप-श्रवण-मात्रेणेव सर्प-भ्रान्तिः, संसारित्व-भ्रान्तिर्ब्रह्म-स्वरूप-श्रवण-मात्रेण निवर्तेत। न तु निवर्त्तते। श्रुत-ब्रह्मणोऽपि यथा-पूर्वं सुख-दुःखादि-संसारि-धर्म-दर्शनात्। "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"(बृ. २.४.५) इति च श्रवणोत्तर-कालयोर्मनन-निदिध्यासनयोर्विधि-दर्शनात्। तस्मात्प्रतिपत्ति-विधि-विषयतयैव शास्त्र-प्रमाणकं ब्रह्माभ्युपगन्तव्यमिति।

**पूर्वपक्षखण्डनम्**

अत्राभिधीयते - न। कर्म-ब्रह्म-विद्या-फलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म श्रुति-स्मृति-सिद्धं धर्माख्यम्, यद्विषया जिज्ञासा "अथातो धर्मजिज्ञासा"(जै.सू. १.१.१) इति सूत्रिता।

अधर्मोऽपि हिंसादिः प्रतिषेध-चोदना-लक्षणत्वाज्जिज्ञास्यः परिहाराय।

तयोः चोदना-लक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुख-दुःखे शरीर-वाङ्-मनोभिः एवोपभुज्यमाने

विषयेन्द्रिय-संयोग-जन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे।

मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुख-तारतम्यमनुश्रूयते। ततश्च तद्धेतोर्धर्मस्यापि तारतम्यं गम्यते।

धर्म-तारतम्यादधिकारि-तारतम्यम्। प्रसिद्धं चार्थित्व-सामर्थ्य-विद्वत्तादि-कृतमधिकारि-तारतम्यम्।

तथा च यागाद्यनुष्ठायिनामेव विद्या-समाधि-विशेषादुत्तरेण पथा गमनम्। केवलैरिष्टापूर्त्त-दत्त-साधनैर्धूमादि-क्रमेण

दक्षिणेन पथा गमनम्।

तत्रापि सुख-तारतम्यम्, तत्साधन-तारतम्यं च शास्त्रात् “यावत्सम्पातमुषित्वा”(छा. ५.१०.५) इत्यस्माद् गम्यते। तथा मनुष्यादिषु स्थावरान्तेषु सुख-लवः चोदना-लक्षण-धर्म-साध्य एवेति गम्यते तारतम्येन वर्त्तमानः। तथोर्ध्व-गतेष्वधो-गतेषु च देहवत्सु दुःख-तारतम्य-दर्शनात्तद्धेतोरधर्मस्य प्रतिषेध-चोदना-लक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवमविद्यादि-दोषवतां धर्माधर्म-तारतम्य-निमित्तं शरीरोपादान-पूर्वकं सुख-दुःख-तारतम्यमनित्यं संसार-रूपं श्रुति-स्मृति-न्याय-प्रसिद्धम्।

तथा च श्रुतिः “न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति”(छा. ८.१२.१) इति यथावर्णितं संसार-रूपमनुवदति।

“अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः”(छा. ८.१२.१) इति प्रियाप्रिय-स्पर्शन-प्रतिषेधात् चोदना-लक्षण-धर्म-

कार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्म-कार्यत्वे हि प्रियाप्रिय-स्पर्शन-प्रतिषेधो नोपपद्येत।

**आक्षेपः**

अशरीरत्वमेव धर्म-कार्यमिति चेत्।

**समाधानम्**

न, तस्य स्वाभाविकत्वात्।

“अशरीरँ् शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति", (क. १.२.२१) “अप्राणो

ह्यमनाः शुभ्रः", (मु. २.१.२) “असङ्गो ह्ययं पुरुषः”(बृ. ४.३.१५) इत्यादि-श्रुतिभ्यः।

अत एवानुष्ठेय-कर्म-फल-विलक्षणं मोक्षाख्यम् अशरीरत्वं नित्यमिति सिद्धम्।

तत्र किञ्चित्परिणामि-नित्यं स्यात्, यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते।

यथा पृथिव्यादि जगन्नित्यत्व-वादिनाम्, यथा वा साङ्ख्यानां गुणाः। इदं तु पारमार्थिकं कूटस्थ-नित्यं व्योमवत्

सर्व-व्यापि सर्व-विक्रिया-रहितं नित्य-तृप्तं निरवयवं स्वयं-ज्योतिः-स्वभावम्।

यत्र धर्माधर्मौ सह कार्येण काल-त्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्।

“अन्यत्र धर्मादन्यत्राधर्माद् अन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च”(क. १.२.१४) इत्यादि-श्रुतिभ्यः।

अतस्तद् ब्रह्म, यस्येयं जिज्ञासा प्रस्तुता।

तद्यदि कर्त्तव्य-शेषत्वेनोपदिश्येत, तेन च कर्त्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्।

तत्रैवं सति यथोक्त-कर्म-फलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत।

नित्यश्च मोक्षः सर्वैर्मोक्ष-वादिभिरभ्युपगम्यते। अतो न कर्त्तव्य-शेषत्वेन ब्रह्मोपदेशो युक्तः।

अपि च "ब्रह्म वेद ब्रह्मैव भवति"(मु. ३.२.८) "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे"(मु. २.२.८)

"आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन"(तै. २.९) "अभयं वै जनक प्राप्तोऽसि"(बृ. ४.२.४)

"तदात्मानमेवावेदहं ब्रह्मास्मीति, तस्मात्तत्सर्वमभवत्"(वाजसनेयिब्राह्मणोपनिषत् १.४.१०) "तत्र को मोहः कः

शोक एकत्वमनुपश्यतः"(ई. ७) इत्येवमाद्याः श्रुतयो ब्रह्म-विद्यानन्तरमेव मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं

वारयन्ति।

तथा “तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च”(बृ. १.४.१०) इति ब्रह्म-दर्शन-सर्वात्म-भावयोर्मध्ये कर्त्तव्यान्तर-वारणायोदाहार्यम्।

यथा ‘तिष्ठन् गायति’ इति तिष्ठति-गायत्योर्मध्ये तत्कर्त्तृकं कार्यान्तरं नास्तीति गम्यते।

“त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि”, (प्र. ६.८) “श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति; सोऽहं भगवः शोचामि, तं मा भगवाञ्छोकस्य पारं तारयतु”(छा. ७.१.३)

“तस्मै मृदित-कषायाय तमसः पारं दर्शयति भगवान्सनात्कुमारः”(छा. ७.२६.२) इति चैवमाद्याः श्रुतयो मोक्ष-प्रतिबन्ध-निवृत्ति-मात्रमेवात्मज्ञानस्य फलं दर्शयन्ति।

तथा च आचार्य-प्रणीतं न्यायोपबृंहितं सूत्रम् - “दुःख-जन्म-प्रवृत्ति-दोष-मिथ्या-ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः”(न्याय.सू. १.१.२) इति। मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्व-विज्ञानाद्भवति।

न चेदं ब्रह्मात्मैकत्व-विज्ञानं सम्पद्रूपम् - यथा “अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति”(बृ. ३.१.९) इति।

न चाध्यास-रूपम् - यथा “मनो ब्रह्मेत्युपासीत”(छा. ३.१८.१) “आदित्यो ब्रह्मेत्यादेशः”(छा. ३.१९.१) इति च मन-आदित्यादिषु ब्रह्म-दृष्ट्यध्यासः। नापि विशिष्ट-क्रिया-योग-निमित्तम् “वायुर्वाव संवर्गः”, “प्राणो वाव संवर्गः”(छा. ४.३.१-४) इतिवत्।

नाप्याज्यावेक्षणादि-कर्मवत् कर्माङ्ग-संस्कार-रूपम्।।

सम्पदादि-रूपे हि ब्रह्मात्मैकत्व-विज्ञानेऽभ्युपगम्यमाने, “तत्त्वमसि”, (छा. ६.८.७) “अहं ब्रह्मास्मि”(बृ. १.४.१०) “अयमात्मा ब्रह्म”(बृ. २.५.१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्व-वस्तु-प्रतिपादन-परः पद-

समन्वयः पीड्येत।

“भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः”(मु. २.२.८) इति चैवमादीन्यविद्या-निवृत्ति-फल-श्रवणान्युपरुध्येरन्।

“ब्रह्म वेद ब्रह्मैव भवति”(मु. ३.२.९) इति चैवमादीनि तद्भावापत्ति-वचनानि सम्पदादि-रूपत्वे न

सामञ्जस्येनोपपद्येरन्।

तस्मान्न सम्पदादि-रूपं ब्रह्मात्मैकत्व-विज्ञानम्। अतो न पुरुष-व्यापार-तन्त्रा ब्रह्म-विद्या।

किं तर्हि, प्रत्यक्षादि-प्रमाण-विषय-वस्तु-ज्ञानवद् वस्तु-तन्त्रैव।

एवं-भूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्।

न च विदि-क्रिया-कर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः। “अन्यदेव तद्विदितादथो अविदितादधि”(के. १.३) इति

विदि-क्रिया-कर्मत्व-प्रतिषेधात्। “येनेदं सर्वं विजानाति तं केन विजानीयात्”(बृ. २.४.१३) इति च।

तथोपास्ति-क्रिया-कर्मत्व-प्रतिषेधोऽपि भवति। “यद्वाचा अनभ्युदितं येन वागभ्युद्यते”इत्यविषयत्वं ब्रह्मण

उपन्यस्य, “तदेव ब्रह्म त्वं विद्धि, नेदं यदिदमुपासते”(के. १.४) इति।

**आक्षेपः**

अविषयत्वे ब्रह्मणः शास्त्र-योनित्वानुपपत्तिरिति चेत्।

**समाधानम्**

न। अविद्या-कल्पित-भेद-निवृत्ति-परत्वाच्छास्त्रस्य। न हि शास्त्रमिदन्तया विषय-भूतं ब्रह्म प्रतिपिपादयिषति।

किं तर्हि, प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत् अविद्या-कल्पितं वेद्य-वेदितृ-वेदनादि-भेदमपनयति।

तथा च शास्त्रम् - **“**यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातम् अविजानताम्**”,**

(के. २.३) **“**न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं श्रृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः**”**(बृ.

३.४.२) इति चैवमादि।

अतोऽविद्या-कल्पित-संसारित्व-निवर्त्तनेन नित्य-मुक्तात्म-स्वरूप-समर्पणान्न मोक्षस्यानित्यत्व-दोषः।

यस्य तूत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्। तथा विकार्यत्वे च।

तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यम्, उत्पाद्यं वा घटादि, नित्यं दृष्टं लोके।

न च आप्यत्वेनापि कार्यापेक्षा, स्वात्म-स्वरूपत्वे सत्यनाप्यत्वात्।

स्वरूप-व्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वम्, सर्व-गतत्वेन नित्याप्त-स्वरूपत्वात्सर्वेण ब्रह्मणः, आकाशस्य इव।

नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्, दोषापनयनेन वा। न तावद्गुणाधानेन सम्भवति, अनाधेयातिशय-ब्रह्म-स्वरूपत्वान्मोक्षस्य।

नापि दोषापनयनेन, नित्य-शुद्ध-ब्रह्म-स्वरूपत्वान्मोक्षस्य।

**आक्षेपः**

स्वात्म-धर्म एव सन् तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते - यथा आदर्शे निघर्षण-क्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेत्।

**समाधानम्**

न। क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया क्रिया, तमविकुर्वती नैवात्मानं लभते।

यद्यात्मा स्वाश्रय-क्रियया विक्रियेत, अनित्यत्वमात्मनः प्रसज्येत।

"अविकार्योऽयमुच्यते"(भ.गी. २.२५) इति चैवमादीनि वाक्यानि बाध्येरन्। तच्चानिष्टम्।

तस्मान्न स्वाश्रया क्रिया आत्मनः सम्भवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयात्मा संस्क्रियते।

**आक्षेपः**

ननु देहाश्रयया स्नानाचमन-यज्ञोपवीत-धारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः।

**समाधानम्**

न। देहादि-संहतस्यैवाविद्या-गृहीतस्यात्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देह-समवायित्वम्।

तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रय-चिकित्सा-निमित्तेन धातु-साम्येन तत्संहतस्य तदभिमानिन आरोग्य-फलम् 'अहमरोगः' इति यत्र बुद्धिरुत्पद्यते। एवं स्नानाचमन-यज्ञोपवीत-धारणादिकया 'अहं शुद्धः संस्कृतः' इति यत्र बुद्धिरुत्पद्यते, स संस्क्रियते। स च देहेन संहत एव। तेनैव अहंकर्त्रा अहं-प्रत्यय-विषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति। "तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति"(मु. ३.१.१) इति मन्त्र-वर्णात्। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुः मनीषिणः"(क. १.३.४) इति च।

तथा “एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च”(श्वे. ६.११) इति, स पर्यागाच्छुक्रम्

अकायमव्रणमस्नाविरं शुद्धमपापविद्धम्”(ई. ८) इति च एतौ मन्त्रावनाधेयातिशयतां नित्य-शुद्धतां च ब्रह्मणो

दर्शयतः। ब्रह्म-भावश्च मोक्षः। तस्मान्न संस्कार्योऽपि मोक्षः।

अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम्।

तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्ध-मात्रस्याप्यनुप्रवेश इह नोपपद्यते।

**आक्षेपः**

ननु ज्ञानं नाम मानसी क्रिया।

**समाधानम्**

न। वैलक्षण्यात्। क्रिया हि नाम सा, यत्र वस्तु-स्वरूप-निरपेक्षैव चोद्यते, पुरुष-चित्त-व्यापाराधीना च।

यथा - "यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट् करिष्यन्"(ऐ.ब्रा. ३.८.१) इति, "सन्ध्यां मनसा ध्यायेत्"(ऐ.ब्रा. ३.८.१) इति चैवमादिषु।

ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्, पुरुष-तन्त्रत्वात्।

ज्ञानं तु प्रमाण-जन्यम्। प्रमाणं च यथा-भूत-वस्तु-विषयम्।

अतो ज्ञानं कर्तुमकर्तुम् अन्यथा वा कर्तुम् न शक्यम्। केवलं वस्तु-तन्त्रमेव तत्।

न चोदना-तन्त्रम्, नापि पुरुष-तन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्।

यथा च "पुरुषो वाव गौतमाग्निः"(छा. ५.७.१) "योषा वाव गौतमाग्निः"(छा. ५.८.१) इत्यत्र

योषित्पुरुषयोरग्नि-बुद्धिर्मानसी भवति। केवल-चोदना-जन्यत्वात्तु क्रियैव सा पुरुष-तन्त्रा च।

या तु प्रसिद्धेऽग्नावग्निबुद्धिः, न सा चोदना-तन्त्रा। नापि पुरुष-तन्त्रा।

किं तर्हि, प्रत्यक्ष-विषय-वस्तु-तन्त्रैवेति ज्ञानमेवैतत्, न क्रिया। एवं सर्व-प्रमाण-विषय-वस्तुषु वेदितव्यम्।

तत्रैवं सति यथा-भूत-ब्रह्मात्म-विषयमपि ज्ञानं, न चोदना-तन्त्रम्।

तद्विषये लिङादयः श्रूयमाणा अपि अनियोज्य-विषयत्वात्कुण्ठीभवन्ति उपलादिषु प्रयुक्त-क्षुर-तैक्ष्ण्यादिवत्।

अहेय-अनुपादेय-वस्तु-विषयत्वात्।

**आक्षेपः**

किमर्थानि तर्हि "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः"(बृ. २.४.५) इत्यादीनि विधि-च्छायानि वचनानि?

**समाधानम्**

स्वाभाविक-प्रवृत्ति-विषय-विमुखी-करणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्त्तते पुरुषः 'इष्टं मे भूयादनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिक-पुरुषार्थवाञ्छिनं स्वाभाविकात् कार्य-करण-सङ्घात-प्रवृत्ति-गोचराद् विमुखीकृत्य प्रत्यगात्म-स्रोतस्तया प्रवर्त्तयन्ति "आत्मा वा अरे द्रष्टव्यः"इत्यादीनि।

तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्म-तत्त्वमुपदिश्यते “इदं सर्वं यदयमात्मा”, (बृ. २.४.६) “यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् ... केन कं विजानीयात् ... विज्ञातारमरे केन विजानीयात्”, (बृ. ४.५.१५) “अयमात्मा ब्रह्म”(बृ. २.५.१९) इत्यादिभिः। यदप्यकर्त्तव्य-प्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते।

अलङ्कारो ह्ययमस्माकम् यद्ब्रह्मात्मावगतौ सत्यां सर्व-कर्त्तव्यता-हानिः, कृत-कृत्यता चेति।

तथा च श्रुतिः “आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसञ्ज्वरेत्”(बृ. ४.४.१२) इति, “एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत”(भ.गी. १५.२०) इति च स्मृतिः।

तस्मान्न प्रतिपत्ति-विधि-शेषतया ब्रह्मणः समर्पणम्।

यदपि केचिदाहुः - प्रवृत्ति-निवृत्ति-विधि-तच्छेष-व्यतिरेकेण केवल-वस्तु-वादी वेद-भागो नास्तीति, तन्न।

औपनिषदस्य पुरुषस्यानन्य-शेषत्वात्।

योऽसावुपनिषत्सु एवाधिगतः पुरुषोऽसंसारी ब्रह्म-स्वरूपः उत्पाद्यादि-चतुर्विध-द्रव्य-विलक्षणः स्व-प्रकरणस्थोऽनन्यशेषः, नासौ नास्तीति नाधिगम्यत इति वा शक्यं वदितुम्।

"स एष नेति नेत्यात्मा"(बृ. ३.९.१६) इत्यात्म-शब्दाद् आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्त्ता तस्यैवात्मत्वात्।

**आक्षेपः**

नन्वात्मा अहं-प्रत्यय-विषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम्।

**समाधानम्**

न। तत्साक्षित्वेन प्रत्युक्तत्वात्।

न ह्यहंप्रत्यय-विषय-कर्त्तृ-व्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थ-नित्यः पुरुषो विधि-काण्डे तर्क-

समये वा केनचिदधिगतः सर्वस्यात्मा।

अतः स न केनचित्प्रत्याख्यातुं शक्यः, विधि-शेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां, न हेयो नाप्युपादेयः।

सर्वं हि विनश्यद्विकार-जातं पुरुषान्तं विनश्यति। पुरुषो हि विनाश-हेत्वभावादविनाशी।

विक्रिया-हेत्वभावाच्च कूटस्थ-नित्यः। अत एव नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावः।

तस्मात् "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः", (क. १.३.११) "तं त्वौपनिषदं पुरुषं पृच्छामि"(बृ. ३.९.२६) इति चौपनिषदत्व-विशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते।

अतो भूत-वस्तु-परो वेद-भागो नास्तीति वचनं साहस-मात्रम्।

यदपि शास्त्र-तात्पर्यविदामनुक्रमणम् - "दृष्टो हि तस्यार्थः कर्मावबोधनम्"इत्येवमादि, तद् धर्म-जिज्ञासा-विषयत्वाद्विधि-प्रतिषेध-शास्त्राभिप्रायं द्रष्टव्यम्। अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानामानर्थक्य-प्रसङ्गः।

प्रवृत्ति-निवृत्ति-व्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थ-नित्यं भूतं नोपदिशतीति को हेतुः।

न हि भूतमुपदिश्यमानं क्रिया भवति।

**आक्षेपः**

अक्रियात्वेऽपि भूतस्य क्रिया-साधनत्वात्क्रियार्थ एव भूतोपदेश इति चेत्।

**समाधानम्**

नैष दोषः। क्रियार्थत्वेऽपि क्रिया-निर्वर्त्तन-शक्तिमद्वस्तूपदिष्टमेव। क्रियार्थत्वं तु प्रयोजनं तस्य।

न चैतावता वस्त्वनुपदिष्टं भवति।

**आक्षेपः**

यदि नामोपदिष्टं किं तव तेन स्यादिति।

**समाधानम्**

उच्यते - अनवगतात्म-वस्तूपदेशश्च तथैव भवितुमर्हति।

तदवगत्या मिथ्या-ज्ञानस्य संसार-हेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रिया-साधन-वस्तूपदेशेन।

अपि च "ब्राह्मणो न हन्तव्यः"इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया। नापि क्रिया-साधनम्।

अक्रियार्थानाम् उपदेशोऽनर्थकश्चेत्, "ब्राह्मणो न हन्तव्यः"इत्यादि-निवृत्त्युपदेशानामानर्थक्यं प्राप्तम्। तच्चानिष्टम्।

न च स्वभाव-प्राप्त-हन्त्यर्थानुरागेण नञः शक्यमप्राप्त-क्रियार्थत्वं कल्पयितुम्, हनन-क्रिया-निवृत्त्यौदासीन्य-

व्यतिरेकेण। नञश्चैष स्वभावः, यत्स्व-सम्बन्धिनोऽभावं बोधयतीति। अभाव-बुद्धिश्चौदासीन्ये कारणम्।

सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति।

तस्मात्प्रसक्त-क्रिया-निवृत्त्यौदासीन्यमेव "ब्राह्मणो न हन्तव्यः"इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र प्रजापति-व्रतादिभ्यः। तस्मात्पुरुषार्थानुपयोग्युपाख्यानादि-भूतार्थ-वाद-विषयम् आनर्थक्याभिधानं द्रष्टव्यम्।

यदप्युक्तम् - कर्त्तव्य-विध्यनुप्रवेशमन्तरेण वस्तु-मात्रमुच्यमानमनर्थकं स्यात् 'सप्तद्वीपा वसुमती' इत्यादिवदिति, तत्परिहृतम्। 'रज्जुरियम्, नायं सर्पः' इति वस्तु-मात्र-कथनेऽपि प्रयोजनस्य दृष्टत्वात्।

ननु श्रुत-ब्रह्मणोऽपि यथा-पूर्वं संसारित्व-दर्शनान्न रज्जु-स्वरूप-कथनवद् अर्थवत्त्वमित्युक्तम्।

अत्रोच्यते - नावगत-ब्रह्मात्म-भावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेद-प्रमाण-जनित-ब्रह्मात्म-भाव-विरोधात्।

न हि शरीराद्यात्माभिमानिनो दुःख-भयादिमत्त्वं दृष्टमिति, तस्यैव वेद-प्रमाण-जनित-ब्रह्मात्मावगमे तदभिमान-निवृत्तौ तदेव मिथ्या-ज्ञान-निमित्तं दुःख-भयादिमत्त्वं भवतीति शक्यं कल्पयितुम्।

न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहार-निमित्तं दुःखं दृष्टमिति, तस्यैव प्रव्रजितस्य धनाभिमान-रहितस्य तदेव धनापहार-निमित्तं दुःखं भवति।

न च कुण्डलिनः कुण्डलित्वाभिमान-निमित्तं सुखं दृष्टमिति तस्यैव कुण्डल-वियुक्तस्य कुण्डलित्वाभिमान-रहितस्य तदेव कुण्डलित्वाभिमान-निमित्तं सुखं भवति।

तदुक्तं श्रुत्या - "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः"(छा. ८.१२.१) इति।

**आक्षेपः**

शरीरे पतितेऽशरीरत्वं स्यात्, न जीवत इति चेत्।

**समाधानम्**

न, सशरीरं त्वस्य मिथ्या-ज्ञान-निमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमान-लक्षणं मिथ्या-ज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वमकर्म-निमित्तत्वादित्यवोचाम।

**आक्षेपः**

तत्कृत-धर्माधर्म-निमित्तं सशरीरत्वमिति चेत्।

**समाधानम्**

न। शरीर-सम्बन्धस्यासिद्धत्वात्। धर्माधर्मयोरात्म-कृतत्वासिद्धेः, शरीर-सम्बन्धस्य धर्माधर्मयोः तत्कृतत्वस्य चेतरेतराश्रयत्व-प्रसङ्गात्। अन्ध-परम्परैषा अनादित्व-कल्पना। क्रिया-समवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः।

**आक्षेपः**

सन्निधान-मात्रेण राज-प्रभृतीनां दृष्टं कर्त्तृत्वमिति चेत्।

**समाधानम्**

न। धनदानाद्युपार्जित-भृत्य-सम्बन्धित्वात्तेषां कर्त्तृत्वोपपत्तेः।

न त्वात्मनो धनदानादिवत् शरीरादिभिः स्व-स्वामि-भाव-सम्बन्ध-निमित्तं किञ्चिच्छक्यं कल्पयितुम्।

मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्ध-हेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्।

**आक्षेपः**

अत्राहुः - देहादि-व्यतिरिक्तस्यात्मनः आत्मीये देहादावभिमानो गौणः, न मिथ्येति चेत्।

**समाधानम्**

न, प्रसिद्ध-वस्तु-भेदस्य गौणत्व-मुख्यत्व-प्रसिद्धेः।

यस्य हि प्रसिद्धो वस्तु-भेदः यथा केसरादिमानाकृति-विशेषोऽन्वय-व्यतिरेकाभ्यां सिंह-शब्द-प्रत्यय-भाङ् मुख्योऽन्यः सिद्धः। ततश्चान्यः पुरुषः प्रायिकैः क्रौर्य-शौर्यादिभिः सिंह-गुणैः सम्पन्नः सिद्धः। तस्य तस्मिन्पुरुषे सिंह-शब्द-प्रत्ययौ गौणौ भवतः। नाप्रसिद्ध-वस्तु-भेदस्य। तस्य त्वन्यत्रान्य-शब्द-प्रत्ययौ भ्रान्ति-निमित्तावेव भवतः, न गौणौ। यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाण-विशेषे पुरुष-शब्द-प्रत्ययौ स्थाणु-विषयौ, यथा वा शुक्तिकायामकस्माद् 'रजतमिदम्' इति निश्चितौ शब्द-प्रत्ययौ, तद्वद् देहादि-सङ्घाते, अहम् इति निरुपचारेण शब्द-प्रत्ययौ आत्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्।

आत्मानात्म-विवेकिनामपि पण्डितानाम् अजाविपालानाम् इव अविविक्तौ शब्द-प्रत्ययौ भवतः।

तस्माद् देहादि-व्यतिरिक्तात्मास्तित्व-वादिनां देहादावहं-प्रत्ययो मिथ्यैव, न गौणः।

तस्मान्मिथ्या-प्रत्यय-निमित्तत्वात्सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषः अशरीरत्वम्।

तथा च ब्रह्मविद्विषया श्रुतिः - "तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेद ँ्शरीरं शेते अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव"(बृ. ४.४.७) इति। "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव"() इति च। स्मृतिरपि "स्थितप्रज्ञस्य का भाषा"(भ.गी २.५४) इत्याद्या स्थित-प्रज्ञस्य लक्षणान्याचक्षाणा विदुषः सर्व-प्रवृत्त्यसम्बन्धं दर्शयति।

तस्मान्नावगत-ब्रह्मात्म-भावस्य यथापूर्वं संसारित्वम्। यस्य तु यथापूर्वं संसारित्वं नासाववगत-ब्रह्मात्म-भाव

इत्यनवद्यम्।

यत्पुनरुक्तं श्रवणात्पराचीनयोर्मनन-निदिध्यासनयोर्दर्शनाद्विधि-शेषत्वं ब्रह्मणः, न स्वरूप-पर्यवसायित्वमिति, तन्न।

श्रवणवद् अवगत्यर्थत्वान्मनन-निदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत्तदा विधि-शेषत्वम्।

न तु तदस्ति। मनन-निदिध्यासनयोरपि श्रवणवद् अवगत्यर्थत्वात्। तस्मान्न प्रतिपत्ति-विधि-विषयतया शास्त्र-

प्रमाणकत्वं ब्रह्मणः सम्भवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्र-प्रमाणकं वेदान्त-वाक्य-समन्वयादिति सिद्धम्।

एवं च सति “अथातो ब्रह्मजिज्ञासा”इति तद्विषयः पृथक् शास्त्रारम्भ उपपद्यते।

प्रतिपत्ति-विधि-परत्वे हि “अथातो धर्मजिज्ञासा”इत्येवारब्धत्वान्न पृथक् शास्त्रमारभ्येत।

आरभ्यमाणं चैवमारभ्येत - ‘अथातः परिशिष्ट-धर्मजिज्ञासा’ इति, “अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा”(जै.सू.

४.१.१) इतिवत्। ब्रह्मात्मैक्यावगतिः त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः “अथातो ब्रह्मजिज्ञासा”इति।

तस्माद् अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः, सर्वाणि चेतराणि प्रमाणानि।

न हि अहेयानुपादेयाद्वैतात्मावगतौ सत्याम्, निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति।

अपि चाहुः - “गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत्।।

अन्वेष्टव्यात्म-विज्ञानात् प्राक्प्रमातृत्वमात्मनः। अन्विष्टः स्यात्प्रमातैव पाप्म-दोषादि-वर्जितः।।

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः।

लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्”(सुन्दरपाण्ड्यकारिका) इति।। १.१.४ ।।